**अत्यन्ताभाव** पु० अत्यन्तः अन्तमतिक्रान्तः नित्यः अभावः कर्म्म० । नास्तीति वाक्याभिलप्यमाने नाशप्रागभावभिन्ने संसर्गाभावे । यथा न्यायमते भूतले घटाभावः प्रतीयते स च भूतले घटोनास्ति इति वाक्येन अभिलप्यते सोऽयमभावः, न नाशः, नापि प्रागभावः तयोः समवायि देशवृत्तित्वनियमात् भूतलादेस्तु तदभावात् । नाशप्राग-भावयोस्तु न अत्यन्तता प्रतियोगिकाले तयोरसत्त्वात् । नापि तयोर्नित्यता प्रागभावस्य प्रयोगिनाश्यत्वात् ध्वंसस्य च प्रतियोगिजन्यत्वात् । भेदस्य नित्यत्वेऽपि संसर्गाभाव-त्वाभावात् न तथात्वम् । अत्यन्ताभावस्य नित्यत्वेऽपि प्रतियोगिसत्त्वकाले न तत्प्रतीतिः अभावप्रत्यक्षे योग्यानु-पलब्धेर्हेतुतया योग्यस्य घटादिरूपप्रतियोगिन उपलब्धौ तदनुपलब्धेरभावात् । नापि एकस्मिन् भावाभावयोः सत्त्वं विरुद्धम् एकस्मिन्नपि वृक्षे कपिसंयोगतद्भावयोरवच्छेद-भेदेन सत्त्वदर्शनात् तथा च एकस्मिन्नपि भूतलेऽवच्छेद-भेदेन तयोः सत्त्वं न विरुध्यते । द्रव्यादौ गुणतदभावयोः कालरूपावच्छेदभेदेन स्थितिरपि न विरुद्धा । तथा च प्रतियोगिसत्त्वकाले द्रव्ये गुणात्यन्ताभावबुद्धिः प्रतिबन्धक-सद्भावेन परं नोदेति इत्येव विरोधमात्रम् । अधिकमभाव-शब्दे वक्ष्यते । "प्रागभावस्तथाध्वंसोऽप्यत्यान्ताभाव एव चेति" भाषा० ।

**अत्यन्तिक** त्रि० अत्यन्तं गच्छति अत्यन्त+ठन् । अति-शयितगमनकारिणि । अतिशयितमन्तिकं निकटं प्रा० स० । अतिनिकटे न० । तद्वृत्तौ त्रि० । नात्यैवात्यन्तिके नोदूरे तत् स्थापयेदिति । अत्या०स० । अतिक्रान्तसामीप्ये दूरे न० । तद्वृत्तौ त्रि० ।

**अत्यन्तीन** त्रि० अन्तस्यात्ययः अत्यन्तम् अत्यये व्ययी० अत्यन्तं गामी अत्यन्त+ख । अतिशयितगतिशीले । "लक्ष्मीं परम्परीणां त्वमत्यन्तीनत्वमुन्नयेति" भट्टिः ।

**अत्यम्ल** पु० अतिशयितोऽम्लोरसः फलपत्रादौ यस्य ब० । (तेतुल) इति प्रसिद्धे तिन्तिड़ीवृक्षे । अत्यन्ताम्लरसवति वस्तु-मात्रे त्रि० । वनवीजपूरे (टावादेवु) इति प्रसिद्धे वृक्षे स्त्री । अम्लरसस्य लक्षणाद्युक्तं सुश्रुते यथा "यो दन्त-हर्षमुत्पादयति मुखस्रावं जनयति श्रद्धाञ्चोत्पादयति सोऽम्ल इति" अम्लो जरणः पाचनः पवननिग्रहणो-ऽनुलोमनः कोष्ठविदाही वहिःशीतः क्लेदनःप्रायशो हृद्यश्चेति स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्त-हर्षनयनसंमीलनरोमसंवेजनकफविलयनशरीरशैथिल्यान्या-पादयति तथा क्षताभिहतदग्धदष्टभग्नस्नूनरुग्णप्रच्युताऽ-वमूत्रितविसर्पितच्छिन्नभिन्नविद्धोत्पिष्टादीनि पाचयत्याग्नेय-स्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति" । अम्ल-द्रव्याणि च तत्र कानिचित् प्राधान्येन दर्शितानि यथा । दाड़िमामलकमातुलुङ्गाम्रातक-कपित्थकरमर्दवरकोलप्राचो-नामलकतिन्तिड़ीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेत-सदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लवर्ग इति ।

**अत्यम्लपर्णी** स्त्री अत्यम्लं पर्णं यस्याः जातित्वात् ङीप् । अत्यम्लपत्रयुक्ते वनवीजपूरे (टावालेवु) इति ख्याते वृक्षे ।

**अत्यय** पु० अति+इण-अच् । अतिक्रमे, अभावे, विनाशे, दोषे, कृच्छ्रे, अतिक्रमय गमने, कार्य्यस्यावश्यम्भावाभावे च । "प्राणात्यये च संप्राप्ते योऽन्नमत्ति यतस्ततः । न स पापेन लिप्येत पद्मपत्रमिवाम्भसेति" स्मृतिः । "क्षुरस्य धारा निशिता दुरत्ययेति" पुरा० अत्ययं कालातिक्रमं न सहते ठक् आत्ययिकः । विलम्बाक्षमे कार्य्ये त्रि० । "आत्ययिकेषु कार्य्येषु सद्य एवाधिवासयेदिति" पुराणम् ।

**अत्यर्थ** न० अतिक्रान्तमर्थमनुरूपस्वरूपं अत्या०स०। अतिशये । तद्वति त्रि० । अत्यये अव्ययी० । अर्थाभावे अव्य० ।

**अत्यल्प** त्रि० अतिशयितोऽल्पः प्रा०स० । अत्यन्ताल्पे अणुतरे च । [कुर्य्यादिति" ।

**अत्यशन** न० अतिशयितमशनम् । अतिभोजने "नचैवात्यशनं

**अत्यष्टि** स्त्री अतिक्रान्ता अष्टिं षोड़शाक्षरपादिकां वृत्तिमेका-क्षराधिक्यात् अत्या०स०। सप्तदशाक्षरपादके छन्दोभेदे ।

**अत्याकार** पु० अतिशयेन आकारः तिरस्कारः अति+आ+कृ-घञ् । तिरस्कारे । "स्लाघात्याकारतदवेतेष्विति" पा० अतिशयित आकारो मूर्त्तिः प्रा०स० । वृहद्देहे पु० । अतिशयित आकारो यस्य ब० । तद्विशिष्टे त्रि० ।

**अत्याग** पु० न त्यागः अभावार्थे न०त० । त्यागाभावे "उपे-त्यातिक्रमे दोषस्तु तेरत्यागदर्शनादिति" स्मृतिः ।

**अत्यागिन्** त्रि० त्यज-घिणुन् सन्दार्थे नञ् त० । कर्म्मफला-ननुसन्धानेन कर्म्मानुष्ठायिनि, त्यागिभिन्ने च ।

**अत्याचार** पु० अत्युत्कट आचारः प्रा०स०। अनुचिताचरणे । अतिक्रमे अव्ययी० । अचारातिक्रमे अव्य० ।

**अत्याज्य** न० न त्यक्तुं शक्यम् शक्यार्थे यत् न कृत्वम् । त्यागाशक्ये त्यागानर्हे च ।

**अत्यादान** त्रि० अतिक्रान्तम् आदानम् । आदानातिक्रान्ते अतिशयितमादानम् प्रा०स०। भृशादाने ।